॥ श्री ॥
अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचितः
॥ श्री मध्वविजयः ॥

१५. पंचदशः सर्गः

भूयोबोधस्ततो भूयो व्याचख्यौ भाष्यमद्भुतम् ।
ग्रामे ग्रामीणसामान्ये वसंस्तत्रामरालये ॥ १५.१ ॥

परपक्षरथारूढं खरतर्कमहायुधम् ।
त्रिविक्रमार्यं सोऽपश्यत् प्रतिवीरमिवाग्रतः ॥ १५.२ ॥

तदा तदाननांभोजाद् वृत्तोपन्यासभारती ।
सेना सेनाग्रहा दिव्या शिबिरादिव निर्ययौ ॥ १५.३ ॥

नात्यत्वरा नातिरया न स्खलंती निरंतरा ।
अनानावयवेत्येव दवीयोभिः प्रतर्किता ॥ १५.४ ॥

सूत्रस्यंदनवृंदाढ्या दुर्वारश्रुतिवारणा ।
सूपपत्तिमहापत्तिर्विचित्रस्मृतिसप्तिका ॥ १५.५ ॥

वर्धितोर्मिहरिप्रेष्ठासुपयोधरसुस्वरा ।
सवितानप्रकाशार्था सागरी श्रीरिवापरा ॥ १५.६ ॥

पद्मेशपदपद्मश्रित् कृत्यांगं पद्मजन्मनः ।
लाळिता शिरसेशेन गंगेवाशेषपावनी ॥ १५.७ ॥

नारायणोऽनंतगुणो ब्रह्माख्यो वेदवेदितः ।
विश्वकर्तेति विश्वज्ञः श्रुत्या युक्त्याऽप्यसीषधत् ॥ १५.८ ॥

प्रधानमपराधीनं कारणं परिणामि यत् ।

पयोवदिति चेत् साध्यवैकल्यं स्यान्निदर्षने ॥ १५.९ ॥

विवादाध्यासिता सृष्टिश्चेतनेच्चानुसारिणी ।
सृष्टित्वात् पटसृष्टिर्वेत्यनुमा पक्षसाधिका ॥ १५.१० ॥

यच्चेतनाचेतनयोरंगांगित्वादि मन्वते ।
सृष्टावीशानपेक्षायां तन्न शोभनतां व्रजेत् ॥ १५.११ ॥

सर्वविन्निर्मितं सर्वं कदाचित्कत्वहेतुतः ।
न यदेवं नो तदेवं यथाऽत्मेतीश्वरानुमा ॥ १५.१२ ॥

बलाय सर्वानुमानां वेदाः स्युर्यैरपालिताः ।
कामादेताः प्रवर्तंते कामिन्य इव भर्तृभिः ॥ १५.१३ ॥

कारणं परिणामि स्याद् ब्रह्म नो चेतनत्वतः ।
न यदित्थं नो तदित्थं यथा क्षीरपुरस्सरम् ॥ १५.१४ ॥

न विष्वकृत् पशुपतिः श्रूयमाणागुणत्वतः ।
चैत्रवत् किं पुनर्विघ्नब्रध्नाद्या बालशंकिताः ॥ १५.१५ ॥

ननु सौख्यादिमान् नेशो दुःखादिरहितत्वतः ।
यो नैवं स्यात् स नैवं स्याद् यथा संसृतिमानिति ॥ १५.१६ ॥

ऐवं चेद् विमतो ज्ञानी न भ्रांतिरहितत्वतः ।
यो नैवं स्यात् स नैवं स्याद् भवीवेत्यनुमीयते ॥ १५.१७ ॥

सर्वज्ञस्याज्ञतां वेदः श्रद्धेयो विरुणद्धि चेत् ।
तस्यै वमांदमानंदं वदन्नाश्राव्यसौ कथम् ॥ १५.१८ ॥

दुःखं परिजिहीर्षन् यः सुखं नोरीचिकीर्षति ।
स हंताऽपतितं दुःखमीशस्य व्यस्मरज्जळः ॥ १५.१९ ॥

यो दुःखसमवायोऽयं चैत्रेतेन ह्यभेदवान् ।
समवायः कश्चिदीशो तदनेकत्वमन्यथा ॥ १५.२० ॥

औपाधिकोऽस्य भेदश्चेत् सत्योऽसत्यः स्विदुच्यताम् ।
तद् द्वयं चोक्तदोषं हि मायिवन्मा वदेत् परम् ॥ १५.२१ ॥

ब्रूयुरौपाधिकं भेदं ज्ञानादीनां यदात्मनः ।
नीत्याऽनया तन्निरासात् स्यात् तस्यानंतधर्मता ॥ १५.२२ ॥

गुणादिभेदे संबंधमपेक्ष्याप्यनवस्थितेः ।
विशेषमात्रेणाऽनंत्यं गुणानां शोभते विभोः ॥ १५.२३ ॥

मन्यंते शून्यमेवान्ये तत्वमागमवैरिणः ।
मता माध्यमिकास्तेऽपि व्यक्ताश्छन्ना इति द्वये ॥ १५.२४ ॥

शून्यं ब्रह्माह्वयेनाऽहुः स्वांश्च वेदांतिनोऽभ्यधुः ।
अतत्वावेदकं वेदं वदंतश्चरमे खलाः ॥ १५.२५ ॥

परतत्वविवर्तत्वादपरस्याखिलस्य च ।
अविशेषत्वतश्चास्य नांतरंतरमेतयोः ॥ १५.२६ ॥

अखंडखंडनन्यायानखंडमपि खंडयन् ।
अखंडयदखंडज्ञो द्वयांश्चाखंडलद्विषः ॥ १५.२७ ॥

विमतं कारणं न स्यादसत्वान्न यदीदृशम् ।
नेदृशं तद् यथा कुंभकर्तेत्यत्रानुमीयते ॥ १५.२८ ॥

अंघो तापस नो शून्यं कारणं कुंभकर्तृवत् ।
यत्संवृत्युत्थितं विश्वं तत् कारणमितीर्यते ॥ १५.२९ ॥

ऐवं चेत् कारणं मा स्म ब्रवीः शून्यं कथंचन ।
आयुष्मंस्तदधिष्ठानं व्युत्पित्सस्व गुरोर्गृहे ॥ १५.३० ॥

विवादस्य पदं न स्यादधिष्ठानमसत्त्वतः ।
वैधर्म्येणैष दृष्टांतः शुक्त्यादिवदितीर्यते ॥ १५.३१ ॥

अतत्त्वावेदकं मानमिति स्वव्याहतं यतः ।
तद्वादी तेन वेदस्य सोऽभिप्रैत्यप्रमाणताम् ॥ १५.३२ ॥

यं तत्त्वावेदकं वेद वेदांशं वेददूषकः ।
तत्वस्यावर्णनीयत्वात् स तत्वावेदकः कथम् ॥ १५.३३ ॥

लक्षणाभिः प्रवर्तंते वाक्यानि तिसृभिर्यदि ।
विषयत्वं लक्षणानां तस्यैवानिष्टमागतम् ॥ १५.३४ ॥

किंचाखंडेऽत्र वाक्यानि किंचिद् विदधते न हि ।
तान्यभ्यधुरभावं चेज्जाड्यादेस्तन्न शोभते ॥ १५.३५ ॥

अभावभावस्याभावाद् भावरूपस्य तस्य तु ।
भावाभावविशेषाणामभावादविशेषिणः ॥ १५.३६ ॥

यो वेदवेदितार्थानां नित्यसंत्यागसंश्रवी ।
वेदबाह्यो विपश्चिद्भिरेष निश्चीयतां ततः ॥ १५.३७ ॥

ज्यायसो दूषणेनैव धूर्तम्मन्योऽपि दूषितः ।
पक्षयोरविशेषत्वादनयोः सद्विपक्षयोः ॥ १५.३८ ॥

असत्वादित्यसौ हेतुरसिद्धो ब्रह्मवादिनः ।
मेति भाण्यविशेषत्वादेतयोर्ब्रह्मशून्ययोः ॥ १५.३९ ॥

सोऽंगीकरोति चेत् सत्त्वं ब्रह्मणः स्याद् विशेषिता ।

न चेत् प्राप्तं पारिशेष्यादसत्त्वं न निरस्यतु ॥ १५.४० ॥

विगीतं न विचार्यं स्यात् न भाव्यं न फलप्रदम् ।
शून्यं ब्रह्माद्यमद्वैतं विधिधीगोचरो न यत् ॥ १५.४१ ॥

खपुष्पवदखंडत्वाद् व्यतिरिक्तं निदर्शनम् ।
प्रमाणादिवदित्येवमूहनीयं यथेप्सितम् ॥ १५.४२ ॥

आम्नायानाममानत्वे धर्मादेरप्रमाणता ।
धर्माद्यभावे नो मानं प्रत्यक्षैकप्रमाणिनः ॥ १५.४३ ॥

न पौरुषेयं वचनं प्रामाण्येन विनिश्चितम् ।
पौरुषेयत्वतो यद्वद् वाक्यमुन्मत्तभाषितम् ॥ १५.४४ ॥

विमतः पुरुषोऽज्ञः स्यात् स्याच्चासौ विप्रलंभकः ।
पुंस्त्वाच्चैत्रवदित्यस्ता सर्वज्ञे केवलानुमा ॥ १५.४५ ॥

दुःखाकरोति यद् दैवं दुःशास्त्रेषूग्र आग्रहः ।
दुःखाकरोऽतिघोरः स्याल्लोकोऽतस्तद्वतां ध्रुवः ॥ १५.४६ ॥

आस्माकेऽपेक्षिते पक्षे मोक्षं दद्यादधोक्षजः ।
यत्र स्वानंदिनः संतः सेवंते विषयान् बहून् ॥ १५.४७ ॥

स्वव्याहत्यादिनोपेक्ष्या मुक्तिर्या निर्विशेषिता ।
कदेत्याद्यनुयोगेऽस्या विशेषः स्यान्ननूत्तरे ॥ १५.४८ ॥

अपि बुद्ध्यादिरहितः पुरुषार्थी न सर्वथा ।
निखिलानुभवाभावात् पुत्तळीकापुरोगवत् ॥ १५.४९ ॥

ज्ञानप्रयत्नवांछावानीशो न ह्यशुभं भजेत् ।
स्वसामर्थ्येन तेनैवं तं च कुर्यात् स तादृशम् ॥ १५.५० ॥

दुःखव्याप्तं सुखं बद्धे दृष्ट्वा मुक्ते निरस्यता ।
स्वरूपं च निरस्येत शून्यवादी तदा भवेत् ॥ १५.५१ ॥

ननु विप्रतिपन्नः स्यादूर्मिमान् देहवत्त्वतः ।
चैत्रो यथेत्युपाधिः स्यात् तत्र चाशुद्धदेहिता ॥ १५.५२ ॥

अनैकांतिकता हेतोर्देहवत्त्वादधीशितुः ।
सोऽदेहश्चेदनिच्छादिर्भवेच्छशविषाणवत् ॥ १५.५३ ॥

ज्ञात्रादिरूपमस्य स्याद् वैलक्षण्याय चेत् ततः ।
तदेव देहशब्दोक्तं न ह्यसौ प्राकृताकृतिः ॥ १५.५४ ॥

एवं स्वरूपदेहत्वं मुक्तस्याप्युररीकृतम् ।
नानिष्टभोगस्तेन स्यात् प्राकृतक्षेत्रसंभवः ॥ १५.५५ ॥

विमतो नावयववान् विनाशित्वप्रसंगतः ।
पटवच्चेदवयवा निरस्यंतेऽत्र कीदृशाः ॥ १५.५६ ॥

सिद्धसाधनता हेतोस्ते भिन्नाश्चेदचिन्मयाः ।
आत्मनो भेदरहिता एष्टव्या एव वादिभिः ॥ १५.५७ ॥

परमाण्वादिदेशेषु व्याप्त्यै व्यामादिकेष्वपि ।
यथाऽऽत्मनः प्रदेशाः स्युस्तेषां नोऽवयवास्तथा ॥ १५.५८ ॥

मुक्तो रूपादिवित् सत्वाज्जडान्यत्वे सतीशवत् ।
दृष्टांतोऽसाध्यविकलस्तस्य सर्वज्ञताग्रहात् ॥ १५.५९ ॥

ईश्वरो न सुखी तेन रूपाद्यनुभवन्नपि ।
दुःखप्रसंगादिति मा वादि तद्व्याप्तिदूषणात् ॥ १५.६० ॥

दृष्टांतो यस्य नेष्टोयं तस्य स्याद् व्यतिरेकवान् ।
शिलावदित्यतः शुद्धचिद्देहेंद्रियभोग्यसौ ॥ १५.६१ ॥

स्वानंदविषये मोक्षे वेदोक्ते युक्तिसाधिते ।
द्वेषोऽयं वादिनां कस्मात् तद्विरुद्धेऽथवाऽऽग्रहः ॥ १५.६२ ॥

ततः स्वतः प्रमाणेन देवो वेदेन वेदितः ।
विष्णुर्मोक्षस्य दातेति विश्वं भवति शोभनम् ॥ १५.६३ ॥

इत्यादीन् दर्शयंत्यर्थान् व्याख्योपन्याससंयुता ।
त्रिविक्रमार्येण तदा विश्वाभिज्ञस्य शुश्रुवे ॥ १५.६४ ॥

अथ प्रायुंक्त विविधान् बोधचापगुणेरितान् ।
विपक्षयुक्तान् वीर्येण तीक्ष्णांस्तर्कशरानसौ ॥ १५.६५ ॥

चिच्छेदातुच्छधिषणस्तांस्तदा तर्कसायकैः ।
प्रयुक्तमात्रान् प्रहसन् लीलयाऽतिशयालुभिः ॥ १५.६६ ॥

अथार्याणीतरजनैरनिवर्त्यानि पूरुषैः ।
विजिगीषुर्द्विजश्रेष्ठो वेदास्त्राणि प्रयुक्तवान् ॥ १५.६७ ॥

वाक्यैरतिबलीयोभिः प्रत्यस्त्रैरिव वैदिकैः ।
अर्थांतरं प्रकटयन् तान्यसौ सन्न्यवर्तयत् ॥ १५.६८ ॥

सप्ताष्टानि दिनान्येवं वादं कृत्वा सहामुना ।
निरुत्तरं च निश्चोद्यं चक्रे चक्रायुधप्रियः ॥ १५.६९ ॥

प्रणम्याऽचष्ट शिष्टोऽसौ क्षम्यतां नाथ चापलम् ।
पदपद्मरजोदास्यं ध्रुवं मे दीयतामिति ॥ १५.७० ॥

व्याख्यां भाष्यस्य भूयोधीः श्रवणं सूरिनंदनः ।

संतः प्रीतिमसंतोऽन्यां सममारेभिरे ततः ॥ १५.७१ ॥

गुर्वाज्ञागौरवाट्टीकां कुर्वन् भाष्यस्य दुष्कराम् ।
षडर्धविक्रमार्योसौ महाचार्यमभाषत ॥ १५.७२ ॥

कवींद्रैर्न समाप्यंते संगृह्यापि यतोऽनिशम् ।
न्यायरत्नानि भाष्याब्धेरस्य गांभीर्यमद्भुतम् ॥ १५.७३ ॥

दशोपनिषदो देवीः देवा इव समीप्सिताः ।
युक्ताः प्रसादयंत्यर्था ऐषु भाष्यालयेष्वलम् ॥ १५.७४ ॥

गीतातात्पर्यभाष्याभ्यामाभ्यां विश्वं प्रकाश्यते ।
गोगणैरप्रतीकारैरर्केंदुभ्यामिवाधिकम् ॥ १५.७५ ॥

इतिहासपुराणाब्धेर्भवच्चित्ताद्रिलोळितात् ।
जातां भारततात्पर्यसुधां कः सन्न सेवते ॥ १५.७६ ॥

पुराणस्थानपांथानामभाषात्रयवेदिनाम् ।
भवता सुसखा चक्रे श्रीभागवतनिर्णयः ॥ १५.७७ ॥

कस्तंत्रसारं संप्राप्य न स्यात् पर्याप्तवांछितः ।
अमरैराश्रितच्छायं कल्पद्रुममिवोत्तमम् ॥ १५.७८ ॥

लोकानामवलोकाय मार्गस्यास्य व्यधाद् भवान् ।
करुणाकर नेत्राभे वादसन्मानलक्षणे ॥ १५.७९ ॥

एकाकी किल यश्चक्रे पदं मौलिषु विद्विषाम् ।
तत्वनिर्णयपार्थोऽयं केन नाम न पूज्यते ॥ १५.८० ॥

वादादयः प्रकरणस्फुलिंगास्तनवोऽप्यलम् ।
विपक्षकक्षं क्षिण्वंति मारुतेन त्वयेरिताः ॥ १५.८१ ॥

अनंतोऽर्थः प्रकटितस्त्वयाऽणौ भाष्यसंग्रहे ।
अहो आत्मपरिज्ञप्त्यै कृष्णेनेवाऽननांतरे ॥ १५.८२ ॥

भगवंश्चित्रकवितां लौकिकीं दर्शयन् किल ।
गोप्यं भारतसंक्षेपमकृथा विश्वविस्मयम् ॥ १५.८३ ॥

नानासुभाषितस्तोत्रगाथादिकृतिसत्कृतीः ।
त्वयि रत्नाकरे रत्नश्रेणीर्वा गणयंति के ॥ १५.८४ ॥

ऐषु दभ्रमतीन् दभ्रान् हसत्युच्चैः सतां सभा ।
चिंतामणींश्चिंतयंती मितानप्यमितार्थदान् ॥ १५.८५ ॥

अपरोऽपीष्यतेऽस्माभिर्ग्रंथेष्वेतेषु सत्स्वपि ।
सत्स्वपींद्रादिषु पुरा तारकारिरिवामरैः ॥ १५.८६ ॥

ग्रंथेभ्य ऐभ्योऽगाधेभ्यो युक्तयो नो दुरुद्धराः ।
मनोमांद्यात् ततो ग्रंथं व्यक्ततर्कततिं कुरु ॥ १५.८७ ॥

इत्यर्थितो व्यधान्मध्वः सोऽनुव्याख्यां सतां सुधाम् ।
दुर्वादिगर्वाद्रिपविं मायिध्वांतरविद्युतिम् ॥ १५.८८ ॥

युगपद् रचयन्नेनां कदाचित् स निरंतरम् ।
चतुरश्चतुरः शिष्यान् लीलयाऽलेखयत् खलु ॥ १५.८९ ॥

युक्ताया युक्तिमालायाः प्रोक्तायास्तत्र चाऽत्मना ।
व्यक्तं चक्रे विवरणं कवींद्रैरेष दुष्करम् ॥ १५.९० ॥

मध्वेंदोर्नित्यसंबंधात् निस्तमस्तापचेतसोः ।
वैकुंठं यातयोः पित्रोः गेहेऽस्यावरजोऽवसत् ॥ १५.९१ ॥

विधिभ्रूविभ्रमभ्रश्यद्धनगोधान्यसंपदा ।
निर्वेदिना वेदविदा तेनाऽपे वेदवादिराट् ॥ १५.९२ ॥

पारिव्राज्यं प्रार्थयंतं पादानम्रमिमं मुहुः ।
समयापेक्षयोर्वीक्षो गमयामास धाम तम् ॥ १५.९३ ॥

न जघास न सुष्वाप न जहास स धीरधीः ।
समयार्थी स्मरन् ज्येष्ठं रामं रामानुजो यथा ॥ १५.९४ ॥

राज्ये कथंचित् संस्थाप्य राजानं विरहार्दितम् ।
अवतारभुवं प्रायाद् भगवान् शरदत्यये ॥ १५.९५ ॥

विशुद्धद्विकुलं श्रौतं शुचिं कृतपितृक्रियम् ।
विरक्तं विषयान् भुक्त्वा व्यधान्मध्वोऽनुजं यतिम् ॥ १५.९६ ॥

रहस्यतिरहस्यं तद् ब्रह्म ब्रह्मसमो ददौ ।
अमुष्मै पंचतपसो न विदुर्यत् तपस्विनः ॥ १५.९७ ॥

प्रेमामृतप्रसन्नास्यस्मितांगापांगपूर्वकम् ।
श्रीविष्णुतीर्थनामास्मै प्रीतितीर्थः प्रदत्तवान् ॥ १५.९८ ॥

श्रवणेनानुवादेन मननेनावृथाऽकरोत् ।
कालं वेदांतशास्त्रस्य वेदांतगुरुसोदरः ॥ १५.९९ ॥

स दांतिभक्तिमाधुर्यपरिचर्यादिमेदुरैः ।
महाविटपिनं चक्रे गुरोः स्वस्थं कृपांकुरम् ॥ १५.१०० ॥

अनंतमतिकारुण्यकल्पद्रुमवतो जनैः ।
अवर्ण्यो महिमा तस्य लौल्यात् संवर्ण्यते मनाक् ॥ १५.१०१ ॥

चतुरोऽसौ प्रवचने मनुसंसिद्धिमान् मनः ।

संख्या मां पूरणी मा गान्मध्वदासमिति व्यधात् ॥ १५.१०२ ॥

दिशं प्रयातं शशिनश्चरंतं पर्यशोधयत् ।
तीर्थकं विष्णुतीर्थं च विष्णुतीर्थष्च तीर्थकम् ॥ १५.१०३ ॥

अकामानामनेकेषां सिद्धिभूमिं तपस्विनाम् ।
तिरोहितात्मा प्रापासौ हरिश्चंद्रमहीधरम् ॥ १५.१०४ ॥

द्वंद्वदुःखानले वीरो मात्सर्येण विमत्सरः ।
तत्याज मत्वा तस्यासावशनादींधनायितम् ॥ १५.१०५ ॥

भक्तैरनुगिरं नीतं प्रार्थितो यतिशेखरः ।
पंचगव्यं पपौ किंचित् पंचमेपंचमे दिने ॥ १५.१०६ ॥

स त्यजन् साहसी तच्च तपस्तेपेऽतितापसम् ।
बिल्वपर्णैः क्शितौ पन्नैस्तृप्तिमान् सलिलैरपि ॥ १५.१०७ ॥

यथेष्टमध्यास्त शिलां यमी सुनियमी स ताम् ।
नाऽध्यासते यामेकाहं दैवभग्नास्तपस्विनः ॥ १५.१०८ ॥

पवनांशानुजो जित्वा पवनं रेचकादिभिः ।
विषयेभ्यो हृषीकाश्वान् मनोयंत्रा समाहरत् ॥ १५.१०९ ॥

स्मरन् मुरारेराकारं दध्यावध्यात्मकोविदः ।
समाधिमाधिशमनं योगिलभ्यं स लब्धवान् ॥ १५.११० ॥

मौकुंदे सुंदरे रूपे स्वानंदादिगुणार्णवे ।
स्वाश्चर्यरत्ने मग्नात्मा नान्यत् किंचिद् विवेद सः ॥ १५.१११ ॥

कामत्रासविहीनस्य तस्य सुज्ञानचक्षुषः ।
विना कैवल्यसाम्राज्यं नार्घो योगमणीरभूत् ॥ १५.११२ ॥

मध्वानुजे मध्वनाथो यं प्रसादं व्यधात् तदा ।
स चित्ताविषयत्वाद् वा गोप्यत्वाद् वा न वर्ण्यते ॥ १५.११३ ॥

अहो महाबोधसेवामहिमाऽस्मिन् युगे यतः ।
धन्योऽसौ सिद्धिमापेमां सोऽमरैरित्यलाळयत ॥ १५.११४ ॥

तीव्रव्रतोऽतींद्रियविद् विद्याब्धिस्तर्कपंडितः ।
अनिरुद्धपदाधारः प्रेष्ठः शिष्यस्तमाययौ ॥ १५.११५ ॥

तेन संप्रार्थितं यातं रूप्यपीठमिमं पुनः ।
कृत्स्नज्ञं कृपया स्वेषु संप्राप्तं मेनिरे प्रजाः ॥ १५.११६ ॥

कवींद्रतिलको विद्वच्छेखरस्तापसाग्रणीः ।
मध्वकेळीशुकोऽस्याभू च्छिष्यो व्यासपदाश्रयः ॥ १५.११७ ॥

असौ दास्यं ध्रुवं यातं महांतं महतामपि ।
व्यधादनुग्रहं कुर्वन् सामर्थ्यैः कौतुकं नृणाम् ॥ १५.११८ ॥

आरुरोह दुरारोहं स परैः प्रीतिकृद्धरेः ।
महांतं महिमानं च महीध्रं च गुहप्रियम् ॥ १५.११९ ॥

आकृष्टोऽस्य गुणैर्व्याप्तैः यो गोदाया उपाययौ ।
स पद्मनाभतीर्थाख्यः शिष्योऽन्योऽभूत् सुचेतसः ॥ १५.१२० ॥

श्रुत्या मत्या सदा भक्त्या विरक्त्या नित्यसेवया ।
यस्मै प्रसन्नः प्राज्येक्षः सद्यो विद्यां ददौ शुभाम् ॥ १५.१२१ ॥

वेदांताब्धिं न यो जातु जहौ विद्वत्तिमिंगिलः ।

युक्तिप्रवाहसंरंभात् परशास्त्रनदीचरः ॥ १५.१२२ ॥

व्याख्याप्रणादमात्रेण वीरं मन्यान् स्वमंडले ।
मायाविग्रामसिंहान् यो वादिसिंहो निराकरोत् ॥ १५.१२३ ॥

मत्तदुर्वादिमातंगतर्कमस्तकदारणे ।
पंचास्यो योऽभवद् व्यक्तं चतुरास्योऽपि केवलम् ॥ १५.१२४ ॥

सन्न्यायरत्नावळिरप्युदपादि यतः परा ।
टीकाऽपराऽनुव्याख्याया अनर्घा बोधसागरात् ॥ १५.१२५ ॥

वेदप्रवचनाचार्यशिष्योऽसाविति पूजितः ।
सभ्यः सभायां यो वेदं व्याचख्यौ वेदसारवित् ॥ १५.१२६ ॥

अनयोः प्रथमे शिष्याश्चरमे चाभवन्निह ।
अनंतबोधस्यानेके यतींद्रा बहुदेशजाः ॥ १५.१२७ ॥

वशीकृतहृषीकाश्च जननाद्युपमर्दिनः ।
नरसिंहपदाधारा अभ्यस्तोपेंद्रनामकाः ॥ १५.१२८ ॥

अदीर्घान्याभिधाना ये श्रीमद्रामपदाश्रयाः ।
अप्रत्यक्शगुणोद्रिक्ता भक्तिवैराग्यसागराः ॥ १५.१२९ ॥

पादैः पुनंतः पृथिवीं दर्शयंतो हरेः पदम् ।
धूतदुस्समयध्वांता भास्करा इव गां गताः ॥ १५.१३० ॥

मोक्षशास्त्रामृतांभोधिसेवया नित्यनिर्वृताः ।
चक्रिचारुतरार्चासु चक्रिणश्चरणार्चकाः ॥ १५.१३१ ॥

मध्वप्रशिष्या बहवः शिष्या ऐषां मुहुस्तथा ।
अलंचक्रुरलं पृथ्वीं सर्वे सद्गुणभूषणाः ॥ १५.१३२ ॥

सदा सकलसच्छास्त्रव्याख्यासौख्यामृताब्धिगाः ।
सर्वे दुर्वादिदुर्वादकांडखंडनमंडनाः ॥ १५.१३३ ॥

भूरिभक्तिभराः केचिदेष्वल्पश्रुतसंपदः ।
अप्यल्पबोधा अपरे बहुश्रुतमहागुणाः ॥ १५.१३४ ॥

बहवो गृहिणोऽप्यस्मात् समग्रानुग्रहं ययुः ।
दीप्रा यत्राग्रय इव त्रयो लिकुचशेखराः ॥ १५.१३५ ॥

माध्वं नियोगं ये प्रायो नात्यजन् विदुषां वराः ।
शिष्यक्षेत्रेषु सद्विद्याबीजावापैकदीक्षिताः ॥ १५.१३६ ॥

ग्रामण्यो ब्राह्मणाग्रण्यः प्रापुः पूर्णक्षशिष्यताम् ।
येषां सद्भुक्तिमात्रेण भवेत् किल परं पदम् ॥ १५.१३७ ॥

शुश्रूषापक्षपाताद्यैः केभ्यश्चित् केवलं ददौ ।
रामप्रियो राम इव स्वां गतिं योगिदुर्लभाम् ॥ १५.१३८ ॥

शिष्यप्रशिष्यातिशया ईदृशा यद्दयोदयात् ।
को नेच्छेत् सुलभं भक्त्या तत्पादसुरपादपम् ॥ १५.१३९ ॥

इत्थं सद्भिः सद्भिरर्च्यो धरायां चक्रे वासं शेषशय्ये शयाने ।
ग्रामे वातैः पाविते काण्वतीर्थैः भक्तप्रीत्या सन्मठेऽनूनबोधः ॥ १५.१४० ॥

आनंदतीर्थभगवद्वदनेंदुबिंबं
विद्यासुधावितितकांति सुकांतिकांतम् ।
यैः प्रैक्ष्यतात्र भवतापशमाय भक्तैः
तद्दासदास्यमपि किं न ददाति पुंसः ॥ १५.१४१ ॥

॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत

श्रीनारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते पंचादशः सर्गः ॥